*स्तुति किया जाता हुआ* – **संचकानः**। संदीप्यमानः – वे.। अस्माभिः स्तूयमानः। संपूर्वः कायतिः शब्दर्मा। तस्य लडर्थे लिटि रूपम्। सा.। सम्यक् कामयमानः – दया.।

*हिंसक के* – **दासस्य**। उपक्षपयितुः – वे.। उपक्षपयितुर् असुरस्य – सा.। सेवकवद् वर्तमानस्य मेघस्य – दया.।of the slave - W. of the Dāsa - G.

*धन को न छोड़ने वाले के* – **नमुचेः**। एतन्नामकस्य – सा.। यः स्वं रूपं न मुञ्चति तस्य – दया.।of Namuci - W. G.

*मनुष्य के लिये प्रगति चाहता हुआ* – **मनवे गातुम् इच्छन्**। संरुद्धाय बभ्रवे गमनमार्गम् इच्छन् – वे.। नमुचिनापहृतगोधनाय मह्यं सुखम् इच्छन् – सा.। मननशीलाय धार्मिकाय मनुष्याय भूमिं वाणीं वा इच्छन् – दया.।desiring to do good to Manu - W. seeking man's prosperity - G.

**यु॒जं हि माम् अकृ॑था॒ आद् इद् इ॑न्द्र शिरो॑ दा॒सस्य॒ नमु॑चेर् मथा॒यन्।**

**अश्मानं चित् स्वर्यं१ वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः॥ ८॥**

युजम्। हि। माम्। अकृथाः। आत्। इत्। इन्द्र। शिरः। दासस्य। नमुचेः। मथायन्।
अश्मानम्। चित्। स्वर्यम्। वर्तमानम्। प्र। चक्रियाऽइव। रोदसी इति। मरुत्ऽभ्यः॥ ८॥

*साथी निश्चय से मुझको बना ले तू तब, हे इन्द्र!,*
*शिर को विनाशक के, न छोडने वाले के, मथता हुआ।*
*व्यापक सूर्य को भी, स्वर्लोक में स्थित को, घूमते हुए को,*
*खूब (साथी बना ले), पहिये जैसों को, द्युलोक-भूलोक को, प्राणियों के लिये॥ ८॥*

हे परमेश्वर! चूँकि तू सज्जनों की रक्षा और हिंसकों का विनाश करना चाहता है, इसलिये तू हिंसा की वृत्ति वाली और दान के लिये धन का त्याग न करने वाली आसुरी शक्ति के विनाश के इस पुण्य कार्य में मुझको भी अपना साथी बना ले। तू इस कार्य में प्रकाशलोक में स्थित, निरन्तर गतिमान, प्रकाश से सर्वत्र व्यापक इस सूर्य को भी अपना साथी बना ले। तू प्राणियों के हित के लिये पहियों की तरह गति करने वाले धरती और आकाश को भी अपना साथी बना ले।

टि. *साथी बना ले* - **युजम् अकृथाः**। सहायम् अकृथाः - वे.। सखायं चकृषे - सा.। युक्तं कुर्याः - दया.। thou hast made me associate - W. G.

*मथता हुआ* - **मथायन्**। मथितुम् इच्छन् - वे.। चूर्णयन् - सा.। मन्थनं कुर्वन् - दया.।

*व्यापक सूर्य को भी* - **अश्मानम् चित्**। अशु व्याप्ताव् इत्यस्माद् सिध्यति रूपम् इदम्। यद्वा अश्मेव दिवि वर्तमानम्॥ वज्रं च - वे.। मेघम् इव स्थितम् - सा.। अश्नुवन्तं मेघम् - दया.। cloud - W. stone - G.

*स्वर्लोक स्थित को* - **स्वर्यम्**। स्वरणकुशलम् - वे। स्वरेण सहितम् - सा.। स्वरेषु शब्देषु साधु - दया.। sounding - W. that is in heaven - G.

*घूमते हुए को* - **वर्तमानम्**। अभिमते देशे गच्छन्तम् - वे.। भ्रमन्तम् - सा.। rolling - W. G.

*पहिये जैसों को* - **चक्रिया इव**। चक्रे इव - वे.। चक्रे इव प्रास्ताम्। सा.। यथा चक्राणि तथा - दया.। as on a car - G.

**स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः।**
**अन्तर् ह्यख्यद् उभे अस्य धेने अथोप प्रैद् युधये दस्युम् इन्द्रः॥ ९॥**

स्त्रियः। हि। दासः। आयुधानि। चक्रे। किम्। मा। करन्। अबलाः। अस्य। सेनाः।
अन्तः। हि। अख्यत्। उभे इति। अस्य। धेने इति॥ अथ। उप। प्र। ऐत्। युधये। दस्युम्। इन्द्रः॥ ९॥

*स्त्रियों को ही हिंसक ने, आयुध बना लिये (इसने),*
*क्या मेरा कर लेंगी (भला), निर्बल इसकी सेनाएं।*
*अन्दर ही अन्दर देख लिया उसने, दोनों को इसके बलधारक जबड़ों को,*
*और पास प्रकर्ष से पहुँचा (इसके), लड़ने के लिये दस्यु के, इन्द्र॥ ९॥*

जो हिंसक, दुष्ट, दुराचारी, आततायी लोग होते हैं, उनके लड़ने के साधन उनके कर्मानुसार स्वयं ही दुर्बल हो जाते हैं। भला ये दुर्बल साधन और निर्बल सेनाएं परमेश्वर के बल के सामने कैसे

ठहर सकते हैं। वह प्रभु अन्दर ही अन्दर जानता है, कि इन दुष्टों के जबड़ों में कितना बल है। इसलिये वह शीघ्र ही ऐसी दुष्ट हिंसक शक्तियों से लड़ने के लिये उनके पास स्वयं ही पहुँच जाता है और उन्हें समूल नष्ट कर देता है। हमेशा सत्य, धर्म और न्याय की ही विजय होती है, असत्य, अधर्म और अन्याय की कभी विजय नहीं हो सकती।

टि. *स्त्रियों को ही हिंसक ने आयुध बना लिया* - **स्त्रियः हि दासः आयुधानि चक्रे।** दासः उपक्षपयिता नमुचिर् असुरः स्त्रीर् युद्धसाधनानि कृतवान् खलु - सा.।

*अन्दर ही अन्दर देख लिया उसने दोनों को इसकी बलधारक भुजाओं को* - **अन्तः हि अख्यत उभे अस्य धेने।** धेना दधातेः - या. (नि. ६.१७)। अथ च धेने आधस्त्ये दंष्ट्रे जिह्वोपजिह्वके वा (दुर्ग.)।। तासु स्त्रीषु रूपयुक्ते द्वे स्त्रियाव् आदाय अन्तः चकार - वे.। इन्द्रस् तासां मध्ये अस्यासुरस्य धेने प्रीणयित्र्यौ सुरूपे उभे द्वे स्त्रियाव् अन्तर् अख्यद् धि - वे.। अन्तः किल प्रकटयति उभे मन्दतीव्रे अस्य मेघस्य धेने वाचौ - दया.। the two his best beloved, (Indra) confined in the inner apartments - W. well he distinguished his two different voices - G.

**सम् अत्र गावो ऽभितो ऽनवन्तेहेह वत्सैर् वियुता यद् आसन्।**
**सं ता इन्द्रो असृजद् अस्य शाकैर्**
**यद् ईं सोमासः सुषुता अमन्दन्।। १०।। २७।।**

सम्। अत्र। गावः। अभितः। अनवन्त। इहऽइह। वत्सैः। विऽयुताः। यत्। आसन्।
सम्। ताः। इन्द्रः। असृजत्। अस्य। शाकैः। यत्। ईम्। सोमासः। सुऽसुताः। अमन्दन्।। १०।।

*सम्यक् यहाँ गौएं, सर्वतः स्तुति करती हैं,*
*इधर-उधर, बछड़ों से बिछुड़ जब जाती हैं।*
*मिला उनको इन्द्र देता है, अपनी शक्तियों से,*
*जब इसको सोम सुष्ठु सवन किये हुए, आनन्दित करते हैं।। १०।।*

गौ ज्ञान और ज्ञानी का प्रतीक है और बछड़े ज्ञान के पिपासु जिज्ञासु जन का प्रतीक हैं। जब ज्ञान अथवा ज्ञानी अपने जिज्ञासुओं से बिछुड़ जाता है तो वह बहुत दुःखी और सन्तप्त होता है और पुनर्मिलन के लिये परमेश्वर की स्तुति करता है। जिज्ञासुओं को ही ज्ञान की आवश्यकता नहीं है, अपितु ज्ञान अथवा ज्ञानियों को भी जिज्ञासु शिष्यों की आवश्यकता होती है। वह भी उनके बिना नहीं रह सकता। यम नचिकेता को कहता है - हमें तेरे जैसे जिज्ञासु शिष्य की ही आवश्यकता है (त्वादृङ् नो भूयान् नचिकेतः प्रष्टा - कठ.उप. २.९)। जब परमेश्वर ज्ञानियों की योगसाधना आदि के द्वारा की हुई भक्ति के द्वारा आनन्दविभोर हो जाता है, तो वह अपने सामर्थ्यों से उन ज्ञानों अथवा ज्ञानियों को पुनः उनके जिज्ञासुओं से मिला देता है।

टि. *सम्यक् स्तुति करती हैं* - **सम् अनवन्त।** सम् अगच्छन्त - वे.। सम् अनवन्त अत्यन्तम् अगच्छन् - सा.। स्तुवन्तु - दया.। wandered about - W. cows went lowing around - G.

*मिला देता है* - **सम् असृजत्।** वत्सैः सह समयोजयत् - सा.। reunited - W. G.

*शक्तियों से* - **शाकैः।** मरुद्भिः सह - वे.। शाकैः शक्तैर् मरुद्भिः सह - सा.। शक्तिभिः - दया.।

with his vigorous (Maruts) - W. with his helpers - G.

*आनन्दित करते हैं* - **अमन्दन्।** अमादयन् - सा.। आनन्दयन्ति - दया.।

**यद् ईं सोमा बभ्रुधूता अमन्दन्नरोरवीद् वृषभः सादनेषु।**
**पुरन्दरः पपिवाँ इन्द्रो अस्य पुनर् गवाम् अददाद् उस्रियाणाम्।। ११।।**

यत्। ईम्। सोमाः। बभ्रुऽधूताः। अमन्दन्। अरोरवीत्। वृषभः। सदनेषु।
पुरम्ऽदरः। पपिऽवान्। इन्द्रः। अस्य। पुनः। गवाम्। अददात्। उस्रियाणाम्।। ११।।

*जब इसको सोम, हविदाता द्वारा सवन किये हुए, आनन्दित करते हैं,*
*अत्यधिक शब्द करता है सुखों का वर्षक, लोकों में।*
*पुरों को दीर्ण करने वाला, पान करता है, इन्द्र इसका,*
*फिर से गौओं को ला देता है, दूध देने वालियों को।। ११।।*

उस परमेश्वर के लिये अपनी आहुतियां लाने वाला यजमान जब उसे अपना भक्तिरसरूपी सोम समर्पित करता है, तो वह आनन्दविभोर होकर तीनों लोकों में गर्जना करता है, जिससे सब दुष्ट आसुरी शक्तियां भयभीत हो जाती हैं। दुष्ट आसुरी शक्तियों के दुर्गों को ध्वस्त कर डालने वाला वह जगदीश जब उपासक के भक्तिरस रूपी अमृत का पान करता है, तो आनन्दित होकर प्रकाश आदि सुखसाधनों को आसुरी शक्तियों के अधिकार से मुक्त करके उस अपने उपासक के लिये फिर से ला देता है।

टि. *हविदाता द्वारा सवन किये हुए* - **बभ्रुधूताः।** बभ्रुणा हविषां भर्त्रा सुताः। बिभर्ति हव्यानि देवेभ्य इति बभ्रुर् याजकः।। बभ्रुनाम्ना मया सुताः - वे.। बभ्रुणाभिषुताः - सा.। बभ्रुभिर् धृतविद्यैर् धूताः पवित्रीकृताः - दया.।

*अत्यधिक शब्द करता है* - **अरोरवीत्।** अत्यन्तं शब्दं करोति - वे.। अत्यर्थं शब्दम् अकरोत् - सा.। भृशं शब्दायते - दया.। shouted aloud - W. loud the Steer bellowed - G.

*लोकों में* - **सदनेषु।** युद्धेषु - वे.। सा.। स्थानेषु - दया.। in the combats - W. in his habitations - G.

*दूध देने वालियों को* - **उस्रियाणाम्।** क्षीरम् उत्स्राविणीर् गाः - सा.। किरणानाम् - दया.।

**भद्रम् इदं रुशमा अग्न अक्रन् गवां चत्वारि ददतः सहस्रा।**
**ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम्।। १२।।**

भद्रम्। इदम्। रुशमाः। अग्ने। अक्रन्। गवाम्। चत्वारि। ददतः। सहस्रा।
ऋणम्ऽचयस्य। प्रऽयता। मघानि। प्रति। अग्रभीष्म। नृऽतमस्य। नृणाम्।। १२।।

*कल्याण कार्य को इसको तेजस्वी जनों ने, हे अग्रणी!, किया है,*
*(ऋग्ज्ञानरूपी) गौओं के चार को, देते हुओं ने हजारों को।*
*ऋण से मुक्त कराने वाले के, प्रदान किये हुओं को, धनों को,*
*स्वीकार किया हमने अतिशय नेतृत्व करने वाले के, नेताओं में से।। १२।।*

हे सन्मार्ग पर आगे ले चलने वाले परमेश्वर! हजारों ऋचाओं का ज्ञान प्रदान करके तेजस्वी जनों

ने हमपर कल्याण करने वाला यह महान् उपकार किया है। विभिन्न प्रकार के ऋणों से मुक्त कराने वाले, मार्गदर्शकों में तुझ उत्तम मार्गदर्शक के द्वारा प्रदान किये हुए इन पवित्र धनों को हम सहर्ष स्वीकार करते हैं।

टि. *कल्याण कार्य को* - **भद्रम्**। भटाः दीप्ताः - वे.। कल्याणम् इदं कर्म - सा.। कल्याणम् - दया.। good deed - G.

*ज्ञानी ऋषियों ने* - **रुशमाः**। रुशम इति कश्चिज् जनपदविशेषः। अत्र रुशमशब्देन तत्रत्या जना उच्यन्ते। रुशमा ऋणंचयनाम्नो राज्ञः किंकराः। सा.। ये रुशान् हिंसकान् मिन्वन्ति - दया.।

*ऋणों से मुक्त कराने वाले के* - **ऋणंचयस्य**। एतन्नामकेन राज्ञा - सा.। ऋणं चिनोति येन तस्य - दया.। Ṛṇacaya's - G.

*प्रदान किये हुओं को* - **प्रयता**। प्रत्तानि - वे.। प्रयतानि दत्तानि - सा.। प्रयत्नेन - दया.।

*धनों को* - **मघानि**। मंहनीयानि गोधनानि - वे.। गोरूपाणि धनानि - सा.। धनानि - दया.।

**सुपेशसं मावं सृजन्त्यस्तं गवां सहस्रै रुशमासो अग्ने।**
**तीव्रा इन्द्रम् अममन्दुः सुतासो ऽक्तोर् व्युष्टौ परितक्म्यायाः।। १३।।**

सुऽपेशसम्। मा। अव। सृजन्ति। अस्तम्। गवाम्। सहस्रैः। रुशमासः। अग्ने।
तीव्राः। इन्द्रम्। अममन्दुः। सुतासः। अक्तोः। विऽउष्टौ। परिऽतक्म्यायाः।। १३।।

*शोभन रूप वाले को मुझको, ले जाते हैं घर में,*
*गौओं के हजारों से युक्त (में), तेजस्वी जन, हे अग्ने।*
*रसवान्, इन्द्र को मुदित करते हैं, सवन किये हुए (सोम),*
*रात्रि की समाप्ति पर, सर्वतः घेरने वाली की (तम से)।। १३।।*

योगसाधना, तपश्चर्या आदि के द्वारा जब साधक भक्तिरस रूपी सोमों का सवन करके उन्हें प्रभु को समर्पित करता है, तो उससे वह आनन्दित हो जाता है। उसकी कृपा से उपासक के लिये तम से घेरने वाली अज्ञान-अन्धकार रूपी रात्रि का अवसान होकर ज्ञानरूपी दिवस का उदय हो जाता है। उपासक के सब दुरित, पाप, कल्मष आदि धुल जाते हैं। पवित्र स्वरूप वाले उस पवित्रात्मा उपासक को, हे मार्गदर्शक परमेश्वर!, आप की कृपा से ज्ञानी जन हजारों ज्ञानरश्मियों से जाज्वल्यमान ज्ञान के सदन में प्रवेश कराते हैं।

टि. *शोभन रूप वाले को* - **सुपेशसम्**। सुरूपम् - वे.। सुरूपम् अलङ्काराच्छादनादिभिः संस्कृतम् - सा.। with fair adornment - G.

*ले जाते हैं* - **अव सृजन्ति**। प्रापयन्ति स्म - सा.। sent me - G.

*घर में* - **अस्तम्**। गृहम् - वे.। सा.। homeward - G.

*रात्रि की समाप्ति पर* - **अक्तोः व्युष्टौ**। (अस्याः) रात्रेः व्युच्छने - वे.। सा.। upon the breaking up of the night - W. when night changed to morning - G.

*घेरने वाली की (तम से)* - **परितक्म्यायाः**। तकतिर् गतिकर्मा। ऋणञ्चयम् अपहाय बभ्रुर् यस्यां रात्र्याम् आगतः सा परितक्म्योच्यते - वे.। तमसा भूतानि परितस् तकति गच्छतीति परितक्म्या तस्याः

– सा.। परितः सर्वतस् तकन्ति हसन्ति यैः कर्मभिस् तेषु भवायाः – दया.।(gloom-) investing - W. whose course was ending - G.

**औच्छ॒त् सा रात्री॒ परि॑तक्म्या॒ याँ ऋ॑णंच॒ये राज॑नि रु॒शमा॑नाम्।**
**अत्यो॒ न वा॒जी र॒घुर् अ॒ज्यमा॑नो ब॒भ्रुश् च॒त्वार्य॑सनत् स॒हस्रा॑।। १४।।**

औच्छ॑त्। सा। रात्री॑। परि॑ऽतक्म्या। या। ऋ॒ण॒म्ऽच॒ये। राज॑नि। रु॒शमा॑नाम्।
अत्यः॑। न। वा॒जी। र॒घुः। अ॒ज्यमा॑नः। ब॒भ्रुः। च॒त्वारि॑। अ॒स॒न॒त्। स॒हस्रा॑।। १४।।

*दिन में बदल गई वह रात्री, तमोमयी (घेरने वाली) जो (थी),*
*ऋणमोचक के, (कृपा करने पर,) स्वामी के, ज्ञानियों के।*
*अश्व की तरह बलवान् की, फुर्तीले की, हाँके जाते हुए की,*
*हवियों को लाने वाला, चार को प्राप्त करता है हजार को (गौओं के)।। १४।।*

अज्ञान–अन्धकार की वह रात्रि जो मनुष्य के जीवन में सब ओर उपस्थित हो जाती है, ज्ञानी गुरुओं, ऋषि–मुनियों और सन्त–महात्माओं के द्वारा मार्गदर्शन करने पर उनके स्वामी उस परम–पिता परमात्मा की कृपा से ज्ञान से भरे प्रकाशमान दि॒न में परिवर्तित हो जाती है। एक बलवान्, शीघ्रगति सम्यक् हाँका जाता हुआ अश्व जिस प्रकार अतिशीघ्र अपने गन्तव्य स्थान पर पहुँच जाता है, उसी प्रकार ज्ञानी गुरुओं के द्वारा सन्मार्ग पर प्रेरित किया हुआ याजक, साधक, उपासक अपने चरम लक्ष्य को प्राप्त कर लेता है और ज्ञान, प्रकाश आदि हजारों प्रकार की प्रभु की कृपाओं को प्राप्त करता है।

टि. *दिन में बदल गई* – औच्छत्। व्युष्टाभवत् – सा.। विवासयति – दया.।has dispersed with the dawn - W. well nigh ended - G.

*ऋणमोचक के, (कृपा करने पर,) स्वामी के* – ऋणञ्चये राजनि। राजनि प्रभाव् ऋणञ्चय एतत्संज्ञके तत्समीप एव – सा.। ऋणं चिनोति यस्मात् तस्मिन् राजनि – दया.।(upon the appearance of) Ṛṇañcaya, the Rāja (of the Ruśmas) - W. G.

*हाँके जाते हुए की (तरह)* – अज्यमानः। प्रेर्यमाणः – सा.। चाल्यमानः – दया.।being summoned - W. urged onward - G.

**चतु॑ःसह॒स्रं गव्य॑स्य प॒श्वः प्रत्य॑ग्रभीष्म रु॒शमे॑ष्वग्ने।**
**घ॒र्मश् चि॑त् त॒प्तः प्र॒वृ॒जे य आसी॑द्**
**अय॒स्मय॒स् तम् वादा॑म॒ विप्राः॑।। १५।। २८।।**

चतु॑ःऽसहस्रम्। गव्य॑स्य। प॒श्वः। प्रति॑। अ॒ग्र॒भी॒ष्म॒। रु॒शमे॑षु। अ॒ग्ने॒।
घ॒र्मः। चि॒त्। त॒प्तः। प्र॒ऽवृजे॑। यः। आसी॑त्। अ॒य॒स्मयः॑। तम्। कुँ इति॑। आदा॑म। विप्राः॑।। १५।।

*चार हजार को, गोजाति पशुओं को,*
*ग्रहण किया हमने रुशमों के पास, हे अग्ने।*
*देगचा भी खौलता हुआ, प्रवर्ग्य के लिये जो था,*
*सुवर्णमय, उसको भी प्राप्त किया हम उपासकों ने।। १५।।*

हे अग्रणी इन्द्र!, ऐश्वर्यवान् परमात्मन्! तुझे अपना स्वामी स्वीकार करने वाले सद्‌गुरुओं,

ऋषि-मुनियों और साधु-सन्तों से हमने असंख्य ज्ञानराशियों को ग्रहण किया है। इसी प्रकार हम उपासकों ने सदा खौलते रहने वाले महावीर पात्र की तरह, प्रभुचिन्तन में सहायक, तेजोमय मानसिक कलश को भी प्राप्त किया है।

टि. *देगचा* - **घर्मः**। महावीर इव - सा.। प्रतापः - दया.। ewer - W. the caldron - G.

*खौलता हुआ* - **तप्तः**। सन्तप्तः शोभनवर्णः - सा.। glowing - W. which was heated - G.

*प्रवर्ग्य के लिये* - **प्रवृजे**। प्रवृञ्जनाय - वे.। सा.। प्रवृजते यस्मिंस् तस्मिन् - दया.। for the solemnity - W. for Pravargya - G.

*सुवर्णमय* - **अयस्मयः**। हिरण्येन निर्मितः - वे.। अयोमयो हिरण्यमयः कलशः - सा.। हिरण्यम् इव तेजोमयः - दया.। golden - W. of metal - G.

*उपासकों ने* - **विप्राः**। मेधाविनः - वे.। सा.। दया.। wise - W. the singers - G.

## सूक्त ३१

ऋषिः - अवस्युर् आत्रेयः। देवता - इन्द्रः। छन्दः - त्रिष्टुप्। त्रयोदशर्चं सूक्तम्।

**इन्द्रो॒ रथा॑य प्र॒वतं॑ कृणोति॒ यम् अ॒ध्यस्था॑न् म॒घवा॑ वाज॒यन्त॑म्।**
**यू॒थेव॑ प॒श्वो व्यु॑नोति गो॒पा अरि॑ष्टो याति प्रथ॒मः सिषा॑सन्॥ १॥**

इन्द्रः॑। रथा॑य। प्र॒ऽवत॑म्। कृ॒णो॒ति॒। यम्। अ॒धि॒ऽअस्था॑त्। म॒घऽवा॑ वा॒ज॒ऽयन्त॑म्।
यू॒थाऽइ॑व। प॒श्वः। वि। उ॒नो॒ति॒ गो॒पाः। अरि॑ष्टः। या॒ति॒। प्र॒थ॒मः। सिसा॑सन्॥ १॥

*इन्द्र रथ के लिये, ढलान वाले मार्ग को बनाता है,*
*जिस (रथ) पर स्थित होता है धनदाता, ऐश्वर्याभिलाषी पर।*
*लहँडों को जिस प्रकार पशुओं के, हाँकता है गवाला,*
*अहिंसित, गमन करता है, मुखिया, धन को चाहता हुआ॥ १॥*

यह जगत् परम ऐश्वर्यों के स्वामी जगदीश्वर का रथ है। यह जगत् भी अपने स्वामी की तरह अनेक प्रकार के ऐश्वर्यों से युक्त और अनेक प्रकार के ऐश्वर्यों की कामना वाला है। वह धनों का दाता स्वामी स्वयं इस रथ में सवार होकर इसे सरल और समतल मार्ग से आगे बढ़ाता है। वह प्रभु सब से महान् है। उसे कोई भी हिंसित नहीं कर सकता। वह सब प्रकार के ऐश्वर्यों को अपने उपासकों को देना चाहता हुआ दुष्ट आसुरी शक्तियों को इस प्रकार आगे-आगे खदेड़ता हुआ चलता चलता है, जिस प्रकार कोई गवाला पशुओं के झुंडों को आगे-आगे हाँकता हुआ चलता है।

टि. *ढलान वाले मार्ग को बनाता है* - **प्रवतं कृणोति**। गमनयोग्यं प्रवणवन्तं देशं करोति - वे.। प्रवणम् आजिं करोति - सा.। निम्नं स्थलं करोति - दया.। directs downwards - W. G.

*लहँडों को जिस प्रकार पशुओं के* - **यूथा इव पश्वः**। गोयूथान् इव गोपालः - वे.। पश्वो यूथेव पशोः पशूनां यूथानि यथा - सा.। समूहान् इव पशूनाम् - दया.।

*हाँकता है* - **व्युनोति**। विविधं प्रेरयति - वे.। (गोपालः पशूनां यूथानि यथा) प्रेरयति (तथा शत्रुसैन्यानि प्रेरयति) - सा.। विशेषेण प्रेरयति - दया.। drives - W. G.

*धन को चाहता हुआ* - **सिषासन्।** शत्रून् सिषासन् - वे.। शत्रुधनानीच्छन् - सा.। इच्छन् - दया.। fain for treasure - G.

**आ प्र द्रव हरिवो मा वि वेनः पिशङ्गराते अभि नः सचस्व।**
**नहि त्वद् इन्द्र वस्यो अन्यद् अस्त्यमेनांश् चिज् जनिवतश् चकर्थ।। २।।**

आ। प्र। द्रव। हरिऽवः। मा। वि। वेनः पिशङ्गऽराते। अभि। नः। सचस्व।
नहि। त्वत्। इन्द्र। वस्यः। अन्यत्। अस्ति। अमेनान्। चित्। जनिऽवतः। चकर्थ।। २।।

*इधर प्रकर्ष से दौड़ तू, हे अश्ववान्!, मत विगतकाम हो तू,*
*हे पीतवर्ण दानों वाले!, सब ओर से हमसे मिल जा तू।*
*नहीं तुझसे, हे इन्द्र!, बढ़कर वासक दूसरा है।*
*स्त्रीरहितों को भी, पत्नियों वाले बना देता है तू।। २।।*

हे शक्तिमान् परमेश्वर! तू दौड़कर आ और हमारी सुध ले। तू हमसे रूठ मत जाना। तू हमारे प्रति अपनी प्रीति और कृपादृष्टि को कम मत कर देना। हे सुवर्णादि पीतवर्ण पदार्थ प्रदान करने वाले प्रभो! तू हमसे मिल जा। तू हमारा हो जा और हमें अपना बना ले। इस जगत् में तुझसे बढ़कर बसने वाला और बसाने वाला और दूसरा कोई नहीं है। तू विद्यास्नात अविवाहित वरों को विदुषी पत्नियां प्रदान करता है, जिससे मनुष्यजाति की वृद्धि और प्रसार होता है।

टि. *मत विगतकाम हो तू* - **मा वि वेनः।** वेनतिः कान्तिकर्मा। अस्मासु विगतकामो मा भूः। सा.। Be not indifferent to us - W. Be not ungracious - G.

*हे पीतवर्ण दानों वाले* - **पिशङ्गराते।** पिशङ्गा रातिर् यस्येति बहुव्रीहिः। पिशङ्गवर्णस्य सुवर्णादेर् इत्यर्थः। वर. (नि.स. ७)। बहुरूपधनेन्द्र - सा.। यः पिशङ्गं सुवर्णादिकं राति ददाति तत्सम्बुद्धौ - दया.। distributer of manifold wealth - W. lover of gold-hued oblation - G.

*नहीं तुझसे बढ़कर वासक* - **नहि त्वत् वस्यः।** यस्मात् त्वत्तः किञ्चिद् अपि वसुमत्तरो नास्ति - वर. (तत्रैव)। त्वत्तः प्रशस्ततरम् नहि अस्ति - वे.। त्वत्तः श्रेयस्करं नह्यस्ति - सा.। there is nothing else that is better than thou - W.There is naught else better than thou art - G.

*स्त्रीरहितों को* - **अमेनान्।** अस्त्रीकान् - वे.। मेनाशब्दः स्त्रीवाची। अपगतस्त्रीकान्। सा.। अविद्यमाना मेनाः प्रक्षेपकर्त्र्यः स्त्रियो येषां तान् - दया.। the wifeless - G.

*पत्नियों वाले* - **जनिवतः।** जायावतः - वर. (तत्रैव)। वे.। सा.। जन्मवतः - दया.।

**उद् यत् सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा।**
**प्राचोदयत् सुदुघा वव्रे अन्तर् वि ज्योतिषा संववृत्वत् तमो ऽवः।। ३।।**

उत्। यत्। सहः। सहसः। आ। अजनिष्ट। देदिष्टे। इन्द्रः। इन्द्रियाणि। विश्वा।
प्र। अचोदयत्। सुऽदुघाः। वव्रे। अन्तः। वि। ज्योतिषा। सम्ऽववृत्वत्। तमः। अवर् इत्यवः।। ३।।

*उत्पन्न जब बल बल से, सब ओर हो जाता है,*
*दे देता है इन्द्र अपनी शक्तियों को, सब को (उपासकों को)।*
*हाँक देता है सुदुघा गौओं को, बाड़े के अन्दर (स्थितों को),*

*विवृत ज्योति से (अपनी), आवरक तम को कर देता है।। ३।।*

जब वह सर्वशक्तिमान् परमेश्वर अपने बल से ही सब ओर बलों का प्रसार करता है, तो वह अपनी सब शक्तियों को अपने उपासकों को भी प्रदान कर देता है। साधक के शरीररूपी बाड़े के अन्दर जो ज्ञानरश्मियां अज्ञान से घिरी हुई सुप्तावस्था में पड़ी होती हैं, वह उनको झझकोरकर जगा देता है और ज्ञान को घेरने वाले अज्ञानान्धकार के आवरण को परे हटा देता है।

टि. *दे देता है इन्द्र शक्तियों को सबको* - **देदिष्ट इन्द्रः इन्द्रियाणि विश्वा।** सर्वाणि बलानि इन्द्रः दीपयति - वे.। इन्द्रः सर्वाणि धनानि। इन्द्रियम् इति धननामैतत्। देदिष्टे यजमानेभ्यो दिशति। सा.। उपदिशति यौगैश्वर्ययुक्तः श्रोत्रादीनि धनानि वा - दया.। Indra grants all sorts of)wealth - W. Indra displayed all powers that he possesses - G.

*बाड़े के अन्दर (स्थितों को)* - **वव्रे अन्तः।** व्रते अन्तः स्थिताः - वे.। वव्रे निवारके पर्वते ऽन्तर् मध्ये बलेन निरुद्धाः - सा.। वृणोति मध्ये - दया.। from the interior of the obstructing (mountain) - W. forth from the cave - G.

*विवृत ज्योति से आवरक तम को कर देता है* - **वि ज्योतिषा संववृत्वत् तमः अवः।** ज्योतिषा वेष्टमानं तमः वि वृणोति - वे.। तेजसा संवरणशीलं तमो निवारितवान् - सा.। dissipates the enveloping darkness with light - W. with the light laid bare investing darkness - G.

**अनवस् ते रथम् अश्वाय तक्षन् त्वष्टा वज्रं पुरुहूत द्युमन्तम्।**
**ब्रह्माण इन्द्रं महयन्तो अर्कैर् अवर्धयन्नहये हन्तवा उ।। ४।।**

अनवः। ते। रथम्। अश्वाय। तक्षन्। त्वष्टा। वज्रम्। पुरुऽहूत। द्युऽमन्तम्।
ब्रह्माणः। इन्द्रम्। महयन्तः। अर्कैः। अवर्धयन्। अहये। हन्तवै। ऊँ इति।। ४।।

*प्राण तेरे लिये रथ को, आशुगमन के लिये बनाते हैं,*
*त्वष्टा वज्र को (बनाता है), हे बहुतों से स्तुत!, दीप्तिमान् को।*
*ब्रह्मज्ञानी (तुझ) इन्द्र को, पूजा करते हुए स्तुतिगानों से,*
*बढ़ाते हैं, आहन्ता को मारने के लिये, निश्चय से।। ४।।*

हे बहुतों के द्वारा पुकारे जाने वाले आत्मा अथवा परमात्मा! प्राण अथवा वायु ही इस शरीररूपी अथवा जगद्रूपी रथ को तेरे लिये शीघ्रगमन के निमित्त उत्तम अवस्था में बनाए रखते हैं। इस जगत् का रचयिता तू ही इस पारदर्शी न्यायव्यवस्था की रचना करता है। इस जगत् में सत्य, पुण्य, प्रकाश आदि का हनन करने वाली आसुरी शक्तियों के विनाश के लिये ब्रह्मज्ञानी लोग अपने स्तुतिगानों से तेरी पूजा करते हुए तुझे बढ़ाते हैं, तेरी महिमाओं का प्रजाओं में प्रचार-प्रसार करते हैं।

टि. *प्राण* - **अनवः।** अन प्राणन इत्यस्माद् धातोर् अनुर् इति रूपं सिध्यति ।। मनुष्याः ऋभवः - वे.। सा.। मनुष्याः। अनव इति मनुष्यनाम (नि. २.३)। दया.। the Ṛbhus - W. Anus - G.

*आशुगमन के लिये* - **अश्वाय।** अश्वानुगुणम् (रथम्) - वे.। अश्वाभ्यां संयोगार्हम् - सा.। सद्योगमनाय - दया.। adapted to its horses - W. for thy Courser - G.

*ब्रह्मज्ञानी पूजा करते हुए* - **ब्रह्माणः महयन्तः।** ब्राह्मणाः पूजयन्तः - वे.। ब्रह्माणो ऽङ्गिरसः

परिवृढा मरुतो वा - सा.। चतुर्वेदविदः पूजयन्तः - दया.। the Brāhmaṇas - G.

*आहन्ता को मारने के लिये* - **अहये हन्तवै।** अहिं वृत्रं हन्तवै हन्तुम् - सा.। मेघाय हन्तुम् - दया.। that he might slaughter Ahi - G.

**वृष्णे यत् ते वृषणो अर्कम् अर्चान् इन्द्र ग्रावाणो अदितिः सजोषाः।**
**अनश्वासो ये पवयो ऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून्।। ५।। २९।।**

वृष्णे। यत्। ते। वृषणः। अर्कम्। अर्चान्। इन्द्र। ग्रावाणः। अदितिः। सऽजोषाः।
अनश्वासः। ये। पवयः। अरथाः। इन्द्रऽइषिताः। अभि। अवर्तन्त। दस्यून्।। ५।।

*सेचक के लिये जब तेरे लिये, सेचनसमर्थ स्तुति का गान करते हैं,*
*हे इन्द्र! सोमसवन करने वाले बट्टे, (और) अदिति संगता।*
*बिना अश्वों वाली जो चक्रधाराएं, बिना रथों वाली,*
*इन्द्र के द्वारा प्रेषित, लुढ़कती हैं हिंसकों की ओर।। ५।।*

हे ऐश्वर्यवान् परमेश्वर! जब दुष्टों के अभिमान को ढीला करने वाले वीर योद्धा तुझ सुखों की वर्षा करने वाले के लिये स्तुति का गान करते हैं, और इसी प्रकार सोमसवन करने वाले सिलबट्टे सोमसवन की ध्वनि से तेरा ही गुणगान करते हैं, अर्थात् तेरे लिये श्रद्धापूर्वक सोम का सवन होता है, तथा अदीना प्रकृति संगत होकर तेरा ही स्तुतिगान करती है, तो दुष्टविनाशक तेरे आयुध बिना अश्वों और रथों वाली, अर्थात् केवल आयुधरूप में ही प्रयुक्त होने वाली चक्रधाराओं की तरह दुष्टों के ऊपर लुढ़ककर उनको कुचल डालते हैं।

टि. *सेचनसमर्थ* - **वृषणः।** वर्षितारः - वे.। वृषणः सेचनसमर्था मरुतः - सा.। वृष्टिनिमित्ताः - दया.। Maruts - W. heroes - G.

*सिलबट्टे* - **ग्रावाणः।** अभिषवपाषाणाः - सा.। मेघाः - दया.। stones - W. G.

*अदिति संगता* - **अदितिः सजोषाः।** गौः सङ्गता - वे.। अदीनाः। वचनव्यत्ययः। सजोषाः सङ्गता बभूवुः। सा.। अन्तरिक्षं समानप्रीतिसेवी - दया.। Aditi accordant - G.

*चक्रधाराएं* - **पवयः।** आयुधानि - वे.। पवमानाः - सा.। चक्राणि - दया.। fellies - G.

*लुढ़कती हैं हिंसकों की ओर* - **अभ्यवर्तन्त दस्यून्।** दस्यून् अभि अवर्तन्त - वे.। शत्रून् अभिभूतान् कुर्वन्तो वर्तन्ते - सा.। अभि वर्तन्ते दुष्टान् चोरान् - दया.। have overcome the Dasyus - W. rolled upon the Dasyus - G.

**प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन् या चकर्थ।**
**शक्तीवो यद् विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः।। ६।।**

प्र। ते। पूर्वाणि। करणानि। वोचम्। प्र। नूतना। मघऽवन्। या। चकर्थ।
शक्तिऽवः। यत्। विऽभराः। रोदसी इति। उभे इति। जयन्। अपः। मनवे। दानुऽचित्राः।। ६।।

*प्रकर्ष से तेरे पूर्व कर्मों को, बखानता हूँ मैं,*
*प्रकर्ष से नूतनों को, हे धनदाता!, जिनको करता है तू।*
*हे शक्तिमन्!, जब विलग करता है तू द्युलोक-भूलोक को, दोनों को,*

*विजित करता हुआ जलों को, मनुष्य के लिये, अद्भुत दान वालों को।। ६।।*

हे लौकिक और अलौकिक धनों के दाता परमेश्वर! जो कर्म तूने पूर्व काल में किये हैं और जिन नूतन कर्मों को तू वर्तमान काल में कर रहा है, मैं उन सब का खूब बखान कर रहा हूँ। उनकी भूरि-भूरि प्रशंसा कर रहा हूँ। हे सर्वशक्तिमान्! तू ही कल्प के आदि में मनुष्य जाति के लिये अद्भुत दान वाले अप्रकेत जलों को वश में करके, उनको हिरण्यगर्भ के रूप में परिणत करके, उस हिरण्यगर्भ को द्युलोक और भूलोक इन दो भागों में अलग-अलग कर देता है। यह सब-कुछ तू मनुष्यों के उपकार के लिये ही करता है।

टि. *कर्मों को* - **करणानि**। कर्माणि - वे.। सा.। कुर्वन्ति यैस् तानि साधनानि - दया.। exploits - W. G.

*विलग करता है तू* - **विभराः**। विविधं बिभर्षि - वे.। विविच्य बिभर्षि - सा.। ये विशेषेण विभरन्ति पोषयन्ति ते - दया.। thou hast distributed (waters) - W. thou sunderedst (earth and heaven) - G.

*अद्भुत दान वालों को* - **दानुचित्राः**। चित्रदानानि (उदकानि) - वे.। चित्रदानाः - सा.। चित्राणि अद्भुतानि दानानि येषां ते - दया.। wonderfully beautiful - W. moistly gleaning waters - G.

**तद् इन् नु ते कर॑णं दस्म वि॒प्राहिं॒ यद् घ्नन्नोजो॒ अत्रामि॑मीथाः।**
**शुष्ण॑स्य चि॒त् परि॑ मा॒या अ॑गृभ्णाः प्रपि॒त्वं यन्नप॒ दस्यूँ॑र् असेधः।। ७।।**

तत्। इत्। नु। ते॒। कर॑णम्। द॒स्म॒। वि॒प्र॒। अहि॑म्। यत्। घ्नन्। ओज॑ः। अत्र॑। अमि॑मीथाः।
शुष्ण॑स्य। चि॒त्। परि॑। मा॒याः। अ॒गृ॒भ्णाः॒। प्र॒ऽपि॒त्वम्। यन्। अप॑। दस्यू॑न्। अ॒से॒धः॒।। ७।।

*वह ही निश्चय से तेरा कर्म है, हे हिंस्रहिंसक!, हे मेधावी!,*
*आहन्ता को जब मारते हुए, बल को इस लोक में प्रदर्शित करता है तू।*
*शोषक के भी सब ओर से छलकपटों को, वश में कर लेता है तू,*
*दौड़कर पास जाता हुआ, परे हिंसकों को खदेड़ देता है तू।। ७।।*

हे हिंसकों की हिंसा कर डालने वाले!, हे प्रज्ञावान् परमेश्वर! तेरा कर्तव्य तो यही है, जो तू सज्जनों का हनन करने वाली कुटिलवृत्ति आसुरी शक्ति को मार डालते हुए अपने बल का प्रदर्शन करता है। जो तू निर्धनों का शोषण करने वाले किसी पुँजीपति के छलकपटों को जानकर उन्हें नष्ट कर देता है। और जो तू अतिशीघ्र हिंसावृत्ति जनों के पास पहुँचकर उन्हें नष्ट कर डालता है।

टि. *हे हिंस्रहिंसक* - **दस्म**। हे दर्शनीय - वे.। सा.। उपक्षेतः - दया.। handsome - W. wonderful - G.

*बल को प्रदर्शित करता है तू* - **ओजः अमिमीथाः**। बलं कृतवान् असि - वे.। बलं प्रकाशितवान् असि - सा.। बलम् इव जलं निर्माणं कुर्याः - दया.। thou hast displayed thy vigour - W. G.

*छलकपटों को वश में कर लेता है तू* - **मायाः अगृभ्णाः**। असुरस्य मायाः परिगृहीतवान् असि - वे.। प्रज्ञाः परिगृहीतवान् असि - सा.। प्रज्ञाः गृहाण - दया.। thou hast arrested the devices - W. didst check and stay wiles and magic - G.

*दौड़कर पास जाता हुआ* - **प्रपित्वम् यन्**। प्राप्तिं गच्छन् - वे.। संग्रामं समीपं वा प्राप्नुवन् - सा.। प्राप्तिं यन् - दया.। urging the combat - W. drawing nigh - G.

*परे खदेड़ देता है तू* - **अप असेधः**। अपाबाधथाः - सा.। निवारयतु - दया.। thou hast overcome - W. didst chase away - G.

**त्वम् अपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र।**
**उग्रम् अयातम् अवहो ह कुत्सं सं ह यद् वाम् उशनारन्त देवाः॥ ८॥**

त्वम्। अपः। यदवे। तुर्वशाय। अरमयः। सुऽदुघाः। पारः। इन्द्र।
उग्रम्। अयातम्। अवहः। ह। कुत्सम्। सम्। ह। यत्। वाम्। उशना। अरन्त। देवाः॥ ८॥

*तू जलों को, यत्नशील के लिये, गति के इच्छुक के लिये,*
*थाम देता है, सुष्ठु दोहन वालों को, पार करने वाला, हे इन्द्र।*
*उग्र पर प्रयाण करते हो तुम दोनों, वहन करता है तू स्तोत्रकर्ता को,*
*मिलकर जब तुम दोनों को, प्रसन्न करते हैं उशना और देव॥ ८॥*

हे ऐश्वर्यों के स्वामी परमात्मन्! उपासकों को दुःखों और संसारसागर से पार करने वाला तू प्रगति चाहने वाले और प्रयत्न करने वाले मनुष्य को उत्तम फल प्रदान करने वाले जल आदि सुखसाधन प्रदान करता है। तू और तेरी स्तुति करने वाला उपासक, तुम दोनों मिलकर उग्र स्वभाव वाले दुष्ट आततायी को आक्रान्त करते हो। तू कार्यों में सहायता करने वाले अपने स्तोता को सुखों की ओर ले जाता है। जीवन में बल, ज्ञान आदि को चाहने वाले और दान, दिव्यता आदि गुणों वाले मनुष्य तुझे और तेरे स्तोता को अपनी स्तुतियों से प्रसन्न करते हैं।

टि. *यत्नशील के लिये* - **यदवे**। यदुनामकाय राज्ञे - सा.। मनुष्याय - दया.।

*गति के इच्छुक के लिये* - **तुर्वशाय**। त्वरां वष्टीति तुर्वशः। मनुष्यनामैतत् (निघ. २.३)॥ एतन्नामकाय राज्ञे च - सा.। सद्यो वशकरणसमर्थाय - दया.।

*थाम देता है* - **अरमयः**। रमितवान् असि - सा.। रमय - दया.। hast rendered agreeable - W. didst stay - G.

*सुष्ठु दोहन वालों को* - **सुदुघाः (अपः)**। ओषधिवनस्पतीन् सुष्ठु दुहतीः - सा.। सुष्ठु दोग्धुम् अर्हाः - दया.। fertilizing - W. the gushing (waters) - G.

*पार करने वाला* - **पारः**। पारे नदीनां तीरे प्रवृद्ध इति शेषः - सा.। यः पारयिता - दया.। abiding on the further bank - W. on the farther bank - G.

*उग्र पर प्रयाण करते हो तुम दोनों* - **उग्रम् अयातम्**। उग्रं शुष्णासुरम् अगच्छतम् - वे.। उग्रम् उद्गूर्णम् - सा.। दुर्जयम् अप्राप्तम् - दया.। have assailed the fierce (Śuṣṇa) - W.

*स्तोत्रकर्ता को* - **कुत्सम्**। ऋषिः कुत्सो भवति कर्ता स्तोमानाम् इत्यौपमन्यवः (नि. ३.११)॥

*उशना* - **उशना**। कामयमानः, कान्तः। वश कान्तौ। वशेः कनसिः (उणा. ४.२३८)इति कनस्॥ उशना भार्गवः - सा.।

*मिलकर प्रसन्न करते हैं* - **सम् अरन्त**। सम् अगच्छन्त - वे.। संभेजिरे - सा.। have honoured

- W. came to you together - G.

**इन्द्राकुत्सा वहमाना रथेना वाम् अत्या अपि कर्णे वहन्तु।**
**निः षीम् अद्भ्यो धमथो निः षधस्थान् मघोनो हृदो वरथस् तमांसि।। ९।।**

इन्द्राकुत्सा। वहमाना। रथेन। आ। वाम्। अत्याः। अपि। कर्णे। वहन्तु।
निः। सीम्। अत्ऽभ्यः। धमथः। निः। सधऽस्थात्। मघोनः। हृदः। वरथः। तमांसि।। ९।।

*हे इन्द्र और स्तोत्रकर्ता! वहन करते हुए रथ के द्वारा,*
*इस ओर तुम दोनों को अश्व भी, श्रवणक्षेत्र में वहन करें।*
*पूर्णतः उसको जलों से फूँक देते हो तुम, पूर्णतः सहस्थान से,*
*धनदाता के हृदय से, निवारित कर देते हो तुम तमों को।। ९।।*

इस मन्त्र में इन्द्र परमात्मा है, इन्द्र के लिये स्तोत्रों की रचना करने वाला कुत्स ऋषि आत्मा है। रथ शरीर है, उसमें जुतने वाले अश्व इन्द्रियां, जल मस्तिष्क और सहस्थान हृदय है। यहाँ प्रार्थना की जा रही है, कि हे परमेश्वर और परमेश्वर का स्तुतिगान करने वाले ऋषि आत्मा! हम उपासकों के इन्द्रियरूपी अश्व तुम दोनों को शरीररूपी रथ में बिठाकर हमारे कानों के इतने निकट ले आएं कि हम तुम्हारे मधुर वचनों और उपदेशों का सुख से श्रवण कर सकें। जब तुम्हारी कृपा होती है, तो तुम पापरूपी असुर को उपासक के मस्तिष्क और हृदय से फूँक मारकर पूर्णतया उड़ा देते हो। तुम धनदाता उपासक के हृदय से अज्ञान के अन्धकारों का भी पूर्णरूपेण निवारण कर देते हो।

टि. *श्रवणक्षेत्र में वहन करें* – **कर्णे वहन्तु।** कर्णकुलजाते मयि – वे.। स्तोत्राणि कृणोति करोतीति कर्णः स्तोता यजमानो वा। तत्समीपे ऽपीति यावत्। आ वहन्तु। आ समन्ताद् वाहका भवन्तु। सा.। कुर्वन्ति येन तस्मिन्, वहन्तु गमयन्तु – दया.। may bring you both to the worshipper - W. let bring you both within hearing distance - G.

*पूर्णतः जलों से फूँक देते हो तुम* – **निः अद्भ्यः धमथः।** अन्तरिक्षात् निः धमथः – वे.। अद्भ्यो ऽप्सु प्रविष्टं शुष्णासुरं निर्धमथः। अबाधेथाम्। सा.। Ye blew him from the waters - G.

*पूर्णतः सहस्थान से* – **निः सधस्थात्।** निः धमथः पृथिव्याः – वे.। सधस्थात्। स्वकीयात् स्थानात् – सा.। from his dwelling - G.

*धनदाता के हृदय से* – **मघोनः हृदः।** महतो ऽस्माकं हृदयात् – वे.। हविष्मतो यजमानस्य हृदयात् – सा.। from the heart of the affluent (adorer) - W. from the noble's spirit - G.

*निवारित कर देते हो तुम* – **वरथः।** वारयथः।। निवारयथः – वे.। सा.।

**वातस्य युक्तान् त्सुयुजश् चिद् अश्वान् कविश् चिद् एषो अजगन्नवस्युः।**
**विश्वे ते अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीम् अवर्धन्।। १०।। ३०।।**

वातस्य। युक्तान्। सुऽयुजः। चित्। अश्वान्। कविः। चित्। एषः। अजगन्। अवस्युः।
विश्वे। ते। अत्र। मरुतः। सखायः। इन्द्र। ब्रह्माणि। तविषीम्। अवर्धन्।। १०।।

*वायु के जुते हुओं को, सुष्ठु दमनीयों को भी अश्वों को,*
*क्रान्तदर्शी भी यह प्राप्त करता है, वृद्धि की कामना वाला।*

*सब तेरे यहाँ मरुत्, सहायता करने वाले,*
*हे इन्द्र!, स्तोत्र (भी) बल को बढ़ाते हैं।। १०।।*

इस मन्त्र में इन्द्र इन्द्रियों का स्वामी आत्मा है। यहाँ अश्व इन्द्रियों के और मरुत् प्राणों के प्रतीक हैं। कहा जा रहा है, कि हे मेरे आत्मा! अपने लक्ष्य की ओर बढ़ने की कामना वाले क्रान्तदर्शी इस साधक ने वायु के वेग के समान गतिशील, दमन के योग्य इन्द्रियों को प्राप्त कर लिया है। अर्थात् इन्द्रियां अब इसके वश में हो गई हैं। इस शरीर में इस साधक के ये सब प्राण, जो हमेशा तेरे साथ चलने वाले हैं, और स्तोत्र सब के सब तेरे बल को बढ़ाने वाले हैं।

टि. *वायु के* - **वातस्य**। गच्छतः - वे.। वायोर् वेगेन - सा.। दया.। endowed (with the speed) of the wind - W. Vāta's - G.

*सुष्ठु दमनीयों को* - **सुयुजः**। सुष्ठु योजनीयान् - सा.। ये सुष्ठु युञ्जते तान् - दया.। उत्तम प्रकार से जुड़ने वाले - सात.। docile - W. G.

*प्राप्त करता है* - **अजगन्**। मनसा गच्छति - वे.। प्राप्नोत् - सा.। hath come - G.

*वृद्धि की कामना वाला* - **अवस्युः**। अवस्युः ऋषिः - वे.। एतन्नामकः - सा.। आत्मनो ऽवो रक्षणम् इच्छुः - दया.। the Sage Avasyu - W. looknig for succour - G.

*मरुत्* - **मरुतः**। बहवः स्तोतारः - सा.। ऋत्विजो विद्वांसः - दया.। all thine adorers - W.

*बल को बढ़ाते हैं* - **तविषीम् अवर्धन्**। बलम् अवर्धयन् - वे.। बलं (ब्रह्माणि ब्रह्मभिः) अवर्धयन् - सा.। सेनां वर्धयन्ति - दया.। बल को बढ़ाया - सात.। augment thy vigour - W. have increased thy power - G.

**सूरश् चिद् रथं परितक्म्यायां पूर्वं करद् उपरं जूजुवांसम्।**
**भरच् चक्रम् एतशः सं रिणाति पुरो दधत् सनिष्यति क्रतुं नः।। ११।।**

सूरः। चित्। रथम्। परिऽतक्म्यायाम्। पूर्वम्। करत्। उपरम्। जूजुऽवांसम्।
भरत्। चक्रम्। एतशः। सम्। रिणाति। पुरः। दधत्। सनिष्यति। क्रतुम्। नः।। ११।।

*प्रेरक (वह इन्द्र) रथ को, समाप्ति पर रात्रि की,*
*पहले कर देता है पीछे वाले को, (बना देता है) शीघ्रगामी।*
*खींचता है चक्र को अश्व (बनकर), मिल जाता है (इससे),*
*आगे स्थापित करता हुआ (स्वयं को), स्वीकार करे वह यज्ञ को हमारे।। ११।।*

जब साधक के अज्ञान-अन्धकार की रात्रि समाप्त हो जाती है, तो सर्वप्रेरक वह परमेश्वर साधना की यात्रा में पिछड़ जाने वाले उस साधक को आगे कर देता है और उसकी गति को और तेज कर देता है। वह प्रभु प्रकाशमान अश्व बनकर इस संसारचक्र को खींच रहा है। वह इस जगत् में सर्वत्र व्याप्त हो रहा है। वह हमारा अगुआ बनकर जीवन में चलने वाले हमारे इस यज्ञ को स्वीकार करे। इस का पुरोहित बनकर इसे पूर्णता की ओर अग्रसर करे।

टि. *प्रेरक* - **सूरः**। सूर्यस्य - वे.। सा.। सूर्यः - दया.। of the sun - W. G.

*समाप्ति पर रात्रि की* - **परितक्म्यायाम्**। रात्र्याम् - वे.। संग्रामे। परितो गच्छन्त्यस्यां भय इति

परितक्म्या संग्रामः। सा.। in battle - W. when night was near its close - G.

*पहले कर देता है पीछे वाले को* – **पूर्वं करत् उपरम्।** अग्रतः प्रादुर्भूतं प्रह्वीचक्रे – वे.। उपरम् उपरतव्यापारं पूर्वं करत् पुरो ऽकरोत् – सा.। carried forward backward in its running - G.

*अश्व (बनकर)* – **एतशः।** एतशः ऋषिः – वे.। एतशाय। विभक्तिव्यत्ययः। सा.।

*मिल जाता है* – **सम् रिणाति।** इन्द्रेण संगच्छते – वे.। हिनस्ति – सा.। गच्छति – दया.। demolishes - W. firmly stays it - G.

*आगे स्थापित करता हुआ (स्वयं को)* – **पुरः दधत्।** सर्वेषां पुरतः स्थापयन् – वे.। अस्मान् पुरस्कुर्वन् – सा.। पुरस्तात् दधाति – दया.। giving us precedence - W. setting eastward - G.

*स्वीकार करे वह यज्ञ को हमारे* – **सनिष्यति क्रतुं नः।** अस्मद्यज्ञम् आगमिष्यति – वे.। अस्मदीयं यज्ञं संभजतु – सा.। संभजेत् प्रज्ञां कर्माणि वा अस्माकम् – दया.। be propitiated by our rite - W. he shall give us courage - G.

**आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोमम् इच्छन्।**
**वदन् ग्रावाव वेदिं भ्रियाते यस्य जीरम् अध्वर्यवश् चरन्ति।। १२।**

आ। अयम्। जनाः। अभिऽचक्षे। जगाम। इन्द्रः। सखायम्। सुतऽसोमम्। इच्छन्।
वदन्। ग्रावा। अव। वेदिम्। भ्रियाते। यस्य। जीरम्। अध्वर्यवः। चरन्ति।। १२।

*इधर यह, हे मनुष्यो!, देखने के लिये, गमन करता है,*
*इन्द्र, सखा को, सवन किये सोम वाले को, ढूँढता हुआ।*
*शब्द करता हुआ ग्रावा, नीचे की ओर वेदि के ले जाया जाता है,*
*जिसकी द्रुतगति को, अध्वर्यु संचालित करते हैं।। १२।।*

हे मनुष्यो! यह परमैश्वर्यवान् प्रभु भक्तिरसरूपी सोम का सवन करने वाले अपने मित्रभूत उपासक को ढूँढता हुआ मिलने के लिये उसके पास आता है। केवल उपासक ही अपने प्रियतम के मिलन के लिये उसकी खोज नहीं करता, अपितु प्रेम के बन्धन में बँधा हुआ वह ईश्वर भी अपने भक्त को मिलने के लिये उसकी खोज करता है। इसी लिये याजक लोग अपने नैवेद्यों को प्रभु को समर्पित करने के साथ-साथ भक्तिरसरूपी सोम के सवन की प्रक्रिया का भी द्रुतगति से संचालन करते रहते हैं। नैवेद्यों के साथ उसे भक्तिरस का आनन्द भी समर्पित करते हैं।

टि. *देखने के लिये* – **अभिचक्षे।** अभिदर्शनार्थम् – वे.। युष्मान् अभिद्रष्टुम् – सा.। अभितः ख्यातुम् – दया.। to see you - G.

*ढूँढता हुआ* – **इच्छन्।** अन्विच्छन् – वे.। अभिलषन् – सा.। seeking - G.

*नीचे की ओर वेदि के ले जाया जाता है* – **अव वेदिम् भ्रियाते।** वेदिं प्रति वेद्याम् इत्यर्थः, तत्राधस्तात् भ्रियते। दीर्घः छान्दसः। वे.। वेदिम् अभिह्रियते – सा.। supply the altar - W. is laid upon the altar - G.

*द्रुतगति को संचालित करते हैं* – **जीरम् चरन्ति।** क्षिप्रं चरन्ति यज्ञ इतस्ततः – वे.। जीरं क्षेपणं प्रेरणं चरन्ति – सा.। वेगं चरन्ति – दया.। whose rotation (the priesrs) hasten - W. come to

turn it quickly - G.

**ये चाकनन्त चाकनन्त नू ते मर्ता अमृत मो ते अंह आरन्।**
**वावन्धि यज्यूँर् उत तेषु धेह्योजो जनेषु येषु ते स्याम।। १३।। ३१।।**

ये। चाकनन्त। चाकनन्त। नु। ते। मर्ताः। अमृत। मो इति। ते। अंहः। आ। अरन्।
ववन्धि। यज्यून्। उत। तेषु। धेहि। ओजः। जनेषु। येषु। ते। स्याम।। १३।।

*जो चाहते हैं (तुझको), चाहते ही हैं निश्चय से वे (तुझको),*
*मरणधर्मा, हे अमरणधर्मा!, मत वे विपत्ति को प्राप्त होवें (कभी)।*
*अपना बना ले तू (उन) पूजकों को, और उनमें स्थापित कर,*
*बल को मनुष्यों में, जिन के मध्य में तेरे होकर रहें हम (सदा ही)।। १३।।*

हे अविनाशी परमेश्वर! जो मनुष्य तुझे प्यार करते हैं, वे तो हमेशा तुझे प्यार ही करते हैं। घोर विपत्तियां और संकट आने पर भी वे तुझे प्यार ही करते हैं। हे प्रभो! ऐसे तेरे प्रिय भक्तों को कभी आपदाएं न घेरें। निष्काम कर्म की भावना वाले ऐसे परोपकारी मनुष्यों को तू अपना बना ले। उनको तू अपनी शरण में ले ले। तू उन्हें ऐसा बल प्रदान कर, कि दुष्ट अत्याचारी लोग उनका बाल भी बाँका न कर सकें। हम भी ऐसे लोगों के मध्य में ही सदा तेरे बनकर रहें।

टि. *चाहते हैं* - **चाकनन्त**। कामितवन्तः - वे.। अकामयन्त - सा.। कामयन्ते - दया.। who were happy still be happy - G.

*मत वे विपत्ति को प्राप्त होवें* - **मो ते अंहः आ अरन्**। अमी मा पापं प्राप्नुवन्तु - वे.। ते जना अनर्थं मा गमन्। मा उ इति निपातसमुदायो मेत्येकनिपातार्थे वर्तते। सा.। मो ते अपराधं समन्तात् प्राप्नुयुः - दया.। let not fall into sin - W. let them not come to sorrow - G.

*अपना बना ले तू पूजकों को* - **ववन्धि यज्यून्**। भजस्व तान् अस्मान् यष्टॄन् - वे.। यजमानान् संभजस्व - सा.। be pleased with sacrificers - W. love thou the pious - G.

## सूक्त ३२

ऋषिः - गातुर् आत्रेयः। देवता - इन्द्रः। छन्दः - त्रिष्टुप्। द्वादशर्चं सूक्तम्।

**अदर्दर् उत्सम् असृजो वि खानि त्वम् अर्णवान् बद्बधानाँ अरम्णाः।**
**महान्तम् इन्द्र पर्वतं वि यद् वः सृजो वि धारा अव दानवं हन्।। १।।**

अदर्दः। उत्सम्। असृजः। वि। खानि। त्वम्। अर्णवान्। बद्बधानान्। अरम्णाः।
महान्तम्। इन्द्र। पर्वतम्। वि। यत्। वर् इति वः। सृजः। वि। धाराः। अव। दानवम्। हन्निति हन्।। १।।

*प्रस्फुटित कर देता है तू स्रोत को, खोल देता है द्वारों को (जलों के),*
*तू जलप्रवाहों को रुके हुओं को, मुक्त कर देता है (बहने के लिये)।*
*महान् को, हे इन्द्र!, पर्वत को, जब विवृत कर देता है तू,*
*बहा देता है धाराओं को, नीचे असुर को मार गिराता है तू।। १।।*

हे ऐश्वर्यशाली जगदीश्वर! तू साधक के हृदय के अन्दर सुप्त पड़े ज्ञान के स्रोत को प्रस्फुटित

कर देता है। तू बन्द पड़े ज्ञान के द्वारों को खोल देता है। तू साधक के अन्दर रुके पड़े ज्ञान के जलप्रवाहों को बहने के लिये मुक्त कर देता है। हे परमेश्वर! जब तू साधक के अन्दर घनीभूत अज्ञानरूपी महान् पर्वत पर प्रहार करके उसे उखाड़ डालता है, तो ज्ञान की धाराएं मुक्त होकर बहने लगती हैं। तू अज्ञानरूपी असुर को मारकर धराशायी कर देता है।

टि. *प्रस्फुटित कर देता है तू स्रोत को* - **अदर्दः उत्सम्।** अदृणा उत्सम्। उत्स उत्सरणाद् वा। उत्सदनाद् वा। उत्स्यन्दनाद् वा। उनत्तेर् वा। या. (नि. १०.९)। दारितवान् असि अपाम् उत्सम् - वे.। उत्सम् उत्स्यन्दमानं मेघम् अदर्दः, विदारितवान् असि - सा.। विदृणाति कूपम् इव - दया.। hast rent the cloud asunder - W. the well thou clavest - G.

*खोल देता है द्वारों को (जलों के)* - **असृजः वि खानि।** मेघद्वाराणि वि असृजः - वे.। खानि मेघस्थोदकानां निर्गमनद्वाराणि व्यसृजः विशेषेण सृष्टवान् असि - सा.। खानि इन्द्रियाणि - दया.। thou hast set open the flood-gates - W. settest free the fountains - G. gavest rest - G.

*मुक्त कर देता है तू* - **अरम्णाः।** रम्णातिः संयमनकर्मा - या. (नि. १०.९)। स्वेस्वे स्थाने अरमयः - वे.। विसर्जयसि। क्षारयसीत्यर्थः। सा.। रमय - दया.। thou hast liberated - W.

*पर्वत को जब विवृत कर देता है तू* - **पर्वतम् वि यत् वः।** यदा महान्तं मेघं दारितवान् असि - वे.। यद् यस् त्वम्। यद् इति लिङ्गव्यत्ययः। मेघं विवृतवान् असि। सा.। hast opened the cloud - W. laying the (great) mountain open - G.

**त्वम् उत्साँ ऋतुभिर् बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन्।**
**अहिं चिद् उग्र प्रयुतं शयानं जघन्वाँ इन्द्र तविषीम् अधत्थाः।। २।।**

त्वम्। उत्सान्। ऋतुऽभिः। बद्बधानान्। अरंहः। ऊधः। पर्वतस्य। वज्रिन्।
अहिम्। चित्। उग्र। प्रऽयुतम्। शयानम्। जघन्वान्। इन्द्र। तविषीम्। अधत्थाः।। २।।

*तू स्रोतों को, ऋतुओं के साथ, रुके हुओं को,*
*चालू कर देता है, ओढी को (भी) पर्वत की, हे वज्रधारी।*
*आहन्ता को भी, हे तेजस्वी!, पसरकर लेटे हुए को,*
*मार डालता है, हे इन्द्र!, बल को अपने दिखा देता है तू।। २।।*

हे न्यायव्यवस्था को अपने वश में रखने वाले जगदीश्वर! तू समय के साथ रुके पड़े ज्ञान के स्रोतों को तेजी से प्रवाहित कर देता है। तू घनीभूत अज्ञान की ग्रन्थि को अतिशीघ्र गलाकर उसके विकार को नष्ट कर देता है। हे दुष्टों के लिये उग्र रूप को धारण करने वाले परमेश्वर! तू साधक के अन्दर पसरकर लेटे हुए अज्ञानरूपी हिंस्र राक्षस को मार डालता है। इस प्रकार तेरे बल की ख्याति सब दिशाओं में फैल जाती है।

टि. *ऋतुओं के साथ रुके हुओं को* - **ऋतुभिः बद्बधानान्।** वर्षर्तुभिः बाधमानान् - वे.। ऋतुषु वृष्टिकालेषु प्रतिबध्यमानान् - सा.। वसन्तादिभिः संबद्धान् - दया.। obstructed in their seasons - G.

*चालू कर देता है (तू)* - **अरंहः।** अगमयः - वे.। सा.। गमयसि - दया.। thou hath invigorated (the strength of the cloud) - W. madest flow - G.

पसरकर लेटे हुए को - **प्रयुतं शयानम्।** प्रवृद्धं शयानम् - वे.। प्रयुतं उद्युक्तं शयानं जले शयनं कुर्वन्तम् - सा.। that lay extended - G.

*बल को अपने दिखा देता है तू* - **तविषीम् अधत्थाः।** बलम् अकृणोः - वे.। बलम् अधारयः। वृत्रवधानन्तरम् इन्द्रो लोके प्रख्यातो भवतीत्यर्थः। सा.। बलयुक्तां सेनां दध्याः - दया.। thou hast established the reputation of thy prowess - W. hast shown thy vigour - G.

**त्यस्यं चिन् महतो निर् मृगस्य वधर् जघान तविषीभिर् इन्द्रः।**
**य एक इद् अप्रतिर् मन्यमान आद् अस्माद् अन्यो अजनिष्ट तव्यान्।। ३।।**

त्यस्यं। चित्। महतः। निः। मृगस्यं। वधः। जघान। तविषीभिः। इन्द्रः।
यः। एकः। इत्। अप्रतिः। मन्यमानः। आत्। अस्मात्। अन्यः। अजनिष्ट। तव्यान्।। ३।।

*उसपर भी महान् पर, निश्शेषेण मार्गणीय पर,*
*आयुध से प्रहार करता है, बलों के साथ इन्द्र।*
*जो एकमात्र, प्रतिस्पर्धिरहित मानता है (स्वयं को),*
*अनन्तर उससे अन्य (इन्द्र), प्रादुर्भूत हो जाता है बलवत्तर।। ३।।*

ज्ञान, प्रकाश आदि सुखसाधनों पर एकाधिकार करके बैठ जाने वाली आसुरी शक्ति स्वयं को अद्वितीय, बेजोड़, और प्रतिस्पर्धिरहित मानती है। परन्तु उससे भी अधिक बलवती ईश्वरीय शक्ति उसके साथ ही अविलम्ब प्रादुर्भूत हो जाती है। वह ईश्वरीय शक्ति आसुरी शक्ति की इस प्रकार तलाश में रहती है, जिस प्रकार मृगयु (शिकारी) मृग (शिकार) की तलाश में रहता है और अवसर मिलते ही अपने सारे बलों के साथ उसपर अपने आयुध से प्रहार करके उसे मार डालती है।

टि. *मार्गणीय पर* - **मृगस्य।** मृग्यत इति मृगस् तस्य।। मृगरूपस्य वधार्थम् - वे.। मृगवद् शीघ्रगामिनः - सा.। सद्योगामिनः - दया.। of that beast - W. of that wild creature - G.

*निश्शेषेण आयुध से प्रहार करता है* - **निः वधः जघान।** आत्मीयं वज्रं निः बलैः जघान इन्द्रः - वे.। आयुधं निश्शेषेणावधीत् - सा.। has annihilated the weapon - W. smote down the weapon - G.

*प्रतिस्पर्धिरहित* - **अप्रतिः।** प्रतिद्वन्द्विरहितः - सा.। अविद्यमाना प्रतिः प्रतीतिर् यस्य - दया.। unmatched - W. unequalled - G.

*अन्य प्रादुर्भूत हो जाता है* - **अन्यः अजनिष्ट।** अन्यः शुष्णो नाम अजनिष्ट - वे.। अन्यो ऽसुरः प्रादुरभूत् - सा.। इन्द्र पैदा हुआ - सात.। another was generated - W. another had been born - G.

**त्यं चिद् एषां स्वधया मदन्तं मिहो नपातं सुवृधं तमोगाम्।**
**वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम्।। ४।।**

त्यम्। चित्। एषाम्। स्वधया। मदन्तम्। मिहः। नपातम्। सुऽवृधम्। तमःऽगाम्।
वृषऽप्रभर्मा दानवस्यं। भामम्। वज्रेण। वज्री। नि। जघान। शुष्णम्।। ४।।

*उसको इन लोकों के बीच में, स्वेच्छा से मुदित होते हुए को,*

*जलों को न गिराने वाले को, सुष्ठु बढ़े हुए को, तमोगामी को।*
*वीर्यवान् पर प्रहार करने वाला, असुर के क्रोध को, वज्र से,*
*वज्रधारी पूर्णत: नष्ट कर देता है, सुखा डालने वाले को।। ४।।*

इन लोकों के मध्य में स्वेच्छा से प्रसन्नतापूर्वक विचरण करने वाली अथवा इन मनुष्यों के बीच में उनके ही अन्न-धन से मौजें उड़ाने वाली, जलों को बरसने न देने वाली, भली प्रकार वृद्धि को प्राप्त, अन्धकार में गति अथवा निवास करने वाली इस आसुरी शक्ति को वीर्यसम्पन्न बलवानों पर प्रहार करने वाला, न्यायव्यवस्थारूपी वज्र को धारण करने वाला वह परमेश्वर उसके सुखा डालने वाले क्रोध के साथ ही नष्ट कर डालता है।

टि. *इन लोकों के बीच में स्वेच्छा से मुदित होते हुए को* - **एषाम् स्वधया मदन्तम्।** एषां मनुष्याणां स्वभूतेनोदकेन मदन्तम् - वे.। एषां प्राणिनाम् अन्नेन मोदमानं सर्वप्राणिनाम् अन्नं स्वयम् एव भुञ्जानम् - सा.। एषां वीराणां मध्ये अन्नादिना हर्षन्तम् - दया.। whom the heavenly food of these delighted - G.

*जलों को न गिराने वाले को* - **मिहः नपातम्।** मिहः पौत्रम् - वे.। सेचनसमर्थस्य मेघस्य नपातं पातारं रक्षितारम्। अत्र नपाच्छब्दः पातरि वर्तते। प्राणो वै तनूनपात् स हि तन्वः पाति। (ऐ.ब्रा. २.४)। इति ब्राह्मणम्। सा.। वृष्टेः अपतनशीलम् - दया.। the protector of showering cloud - W. child of the mist - G.

*तमोगामी को* - **तमोगाम्।** तमसो निर्गमयितारम् - वे.। तमो ऽन्धकारं गच्छन्तम् - सा.। प्राप्तान्धकारम् - दया.। the walker in darkness - W. couched in darkness - G.

*वीर्यवान् पर प्रहार करने वाला* - **वृषप्रभर्मा।** वर्षणशीलप्रहरणः - वे.। वर्षणशीलस्य मेघस्य प्रहर्ता - सा.। यो वर्षणशीलं मेघं प्रबिभर्ति सः - दया.। the bolt-hurling - G.

*क्रोध को* - **भामम्।** क्रोधम् - वे.। दया.। अत्र क्रोधवाचिभामशब्देन क्रोधाद् उत्पन्नः शुष्णासुरो लक्ष्यते - सा.। the wrath-born - (son) - W. wrath-fire - G.

*सुखा डालने वाले को* - **शुष्णम्।** शुष्णासुरम् - सा.। शोषकं बलवन्तम् - दया.।

**त्यं चिद् अस्य क्रतुभिर् निषत्तम् अमर्मणो विदद् इद् अस्य मर्म।**
**यद् ईं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः।। ५।।**

त्यम्। चित्। अस्य। क्रतुऽभिः। निऽसत्तम्। अमर्मणः। विदत्। इत्। अस्य। मर्म।
यत्। ईम्। सुऽक्षत्र। प्रऽभृता। मदस्य। युयुत्सन्तम्। तमसि। हर्म्ये। धाः।। ५।।

*उस (वृत्र) को भी, उसके कर्मों के द्वारा (जान लेता है) गहरे में स्थित को,*
*स्वयं को मर्मरहित समझने वाले के, जान ही लेता है वह उसके मर्म को।*
*जब इसको, हे उत्तम बल वाले!, समर्पित किये जाने पर हर्षकर सोम के,*
*युद्ध करना चाहने वाले को, अन्धकार वाले स्थान में धर दबोचता है तू।। ५।।*

वह जगदीश्वर गूढ़ स्थान में छुपी हुई को भी उस आसुरी शक्ति को उसके कर्मों के द्वारा जान लेता है और स्वयं को मर्महीन समझने वाली के उसके प्रहार के योग्य दुर्बल अंग (मर्मस्थान) को

भी जान लेता है। हे उत्तम बलों वाले! जब तेरे उपासक तुझे अपने भक्तिरसरूपी सोमों को समर्पित करते हैं, जब सच्चे हृदय से तुझे पुकारते हैं, तो युद्ध करने की इच्छा वाली उस आसुरी शक्ति को तू उसके घुप अन्धेरे वाले स्थान में ही धर दबोचता है और उसे समूल नष्ट कर देता है।

टि. उस *(वृत्र)* को भी - **त्यम् चित्**। तम् - वे.। त्यं त्यद् तद् एव। लिङ्गव्यत्ययः। सा.।

*उसके कर्मों के द्वारा* - **अस्य क्रतुभिः**। इन्द्रः प्रज्ञाभिः अविन्दत् - वे.। अस्य वृत्रस्य प्रज्ञानैः - सा.। by his acts - W.

*गहरे में स्थित को* - **निषत्तम्**। निषत्तशब्द आवासवचनः। शुष्णासुरस्य तं निषत्तं तमसि स्थितम्। वे.। निषण्णम् - सा.। दया.। the secret - W.

*स्वयं को मर्महीन समझने वाले के* - **अमर्मणः**। गूढमर्मणः - वे.। मर्महीनम् आत्मानं मन्यमानस्य वृत्रस्य। मर्म प्राणस्थानम्। यत्र स्थाने विद्धो म्रियते तन् मर्मेत्युच्यते। सा.। अविद्यमानानि मर्माणि यस्य तस्य। मर्म गुह्यावयवम्। दया.। of him who thought himself invulnerable - W.

*समर्पित किये जाने पर हर्षकर सोम के* - **प्रभृता मदस्य**। सोममदस्य प्रादुर्भावे - वे.। मादकस्य सोमस्य प्रभृतौ संभरणे सति - सा.। प्रकर्षेण धारणे पोषणे वा हर्षस्य - दया.। in the exhilaration of the Soma - W. after offered draughts - G.

*अन्धकार वाले स्थान में धर दबोचता है तू* - **तमसि हर्म्ये धाः**। हरणशीले तमसि निहितवान् - वे.। हर्म्ये हारके तमसि धाः न्यदधाः। वृत्र इन्द्रस्य भयात् तमसि प्राविशद् इत्यर्थः। सा.। thou hast detected him in his dark abode - W. thou laidest him in the pit in darkness - G.

**त्यं चिद् इत्था कत्पयं शयानम् असूर्ये तमसि वावृधानम्।**
**तं चिन् मन्दानो वृषभः सुतस्योच्चैर् इन्द्रो अपगूर्या जघान।। ६।। ३२।।**

त्यम्। चित्। इत्था। कत्पयम्। शयानम्। असूर्ये। तमसि। ववृधानम्।
तम्। चित्। मन्दानः। वृषभः। सुतस्य। उच्चैः। इन्द्रः। अपऽगूर्य। जघान।। ६।।

*उसको निश्चय से सचमुच, सुखों का पान करने वाले को, लेटे हुए को,*
*सूर्य से रहित स्थान में, अन्धकार के अन्दर, वृद्धि को प्राप्त होते हुए को।*
*उसको निश्चय से हर्षित होता हुआ, सुखवर्षक, सोम के पान से,*
*ऊँचा, इन्द्र उठाकर (वज्र को), मार डालता है (वृत्र को)।। ६।।*

उस आसुरी शक्ति को अन्धकार और अज्ञान ही प्रिय है। वह प्रकाश और ज्ञान से परे अन्धकार और अज्ञान के स्थान में ही बढ़ती और परिपुष्ट होती है। वह परमेश्वर के द्वारा सब के लिये प्रदान किये हुए सुखसाधनों को अपने नीचे दबाकर उनपर लेट जाती है और उन सुखों का केवल स्वयं ही उपभोग करती है। अपने लिये ही जीने वाली ऐसी उस दुष्ट स्वार्थी आसुरी शक्ति को भक्तिरसरूपी सोम के पान से आनन्दविभोर होकर सुखों की वर्षा करने वाला वह परमेश्वर अपनी न्यायव्यवस्था के उच्च प्रभाव से नष्ट कर डालता है।

टि. सचमुच - **इत्था**। इत्थम् - वे.। अमुत्रान्तरिक्षलोके - सा.। अनेन प्रकारेण - दया.।

*सुखों का पान करने वाले को* - **कत्पयम्**। 'सुखपयसम्, सुखम् अस्य पयः' इति यास्कः (६.

३)। वे.। कत् सुखकरं पयो यस्य तम् - सा.। कतिःयम्। अत्र छान्दसो वर्णलोपः। दया.। enjoying the dews of firmament - W. huge in length, extended - G.

*सूर्य से रहित स्थान में* - **असूर्ये**। सूर्यरहिते - सा.। दया.। in sunless (darkness) - W.

*हर्षित होता हुआ सोम के पान से* - **मन्दानः सुतस्य**। सुतेन सोमेन तृप्यन् - वे.। अभिषुतेन सोमेन मोदमानः - सा.। rejoicing in the poured libation - G.

*उठाकर (वज्र को)* - **अपगूर्य**। वज्रम् उद्यम्य - सा.। after loud-voiced threats - G.

**उद् यद् इन्द्रो महते दानवाय वधर् यमिष्ट सहो अप्रतीतम्।**
**यद् ईं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोर् अधमं चकार।। ७।।**

उत्। यत्। इन्द्रः। महते। दानवाय। वधः। यमिष्ट। सहः। अप्रतिऽइतम्।
यत्। ईम्। वज्रस्य। प्रऽभृतौ। ददाभ। विश्वस्य। जन्तोः। अधमम्। चकार।। ७।।

*ऊपर को जब इन्द्र, महान् दानव के लिये,*
*आयुध को उठाता है, विजेता को, अनाक्रान्त को।*
*जब उसको वज्र के प्रहार से, हिंसित कर देता है,*
*सब जीवों से नीचा, बना देता है (उसको)।। ७।।*

जब परमेश्वर महान् दुष्ट आसुरी शक्ति के विनाश के लिये बलवती और किसी के द्वारा भी अन्यथा न की जा सकने वाली अपनी न्यायव्यवस्था का भली प्रकार प्रयोग करता है, तो वह उसे उसके द्वारा नष्ट कर डालता है और सब जीवों की अपेक्षा निम्नतम स्थिति में पहुँचा देता है।

टि. *ऊपर को आयुध को उठाता है* - **उत् वधः यमिष्ट**। उदयच्छद् आयुधम् - वे.। वज्रम् उदयच्छत् - सा.। raised his weapon - W.

*विजेता को* - **सहः**। सहनशीलम् - वे.। शत्रूणाम् अभिभवितृ - सा.। बलम् - दया.। powerful - W. power - G.

*वज्र के प्रहार से* - **वज्रस्य प्रभृतौ**। वज्रस्य प्रहरणे - वे.। वज्रस्य प्रभृतौ प्रहृतौ प्रहरणे सति - सा.। with the blow of the thunderbolt - W. at the hurling of his bolt - G.

*सब जीवों से नीचा बना देता है* - **विश्वस्य जन्तोः अधमम् चकार**। सर्वस्य प्राणिजातस्य अधः चकार - वे.। सा.। made him the lowest of all the creatures - W. G.

**त्यं चिद् अर्णं मधुपं शयानम् असिन्वं वव्रं मह्याददद् उग्रः।**
**अपादम् अत्रं महता वधेन नि दुर्योण आवृणङ् मृध्रवाचम्।। ८।।**

त्यम्। चित्। अर्णम्। मधुऽपम्। शयानम्। असिन्वम्। वव्रम्। महि। आदत्। उग्रः।
अपादम्। अत्रम्। महता। वधेन। नि। दुर्योणे। अवृणक्। मृध्रऽवाचम्।। ८।।

*उसको भी गतिशील को, मधु का पान करने वाले को, लेटे हुए को,*
*शत्रुपरास्ता को, आच्छादक को, महान् को, वश में कर लेता है उग्र।*
*पाँव से हीन को, खा जाने वाले को, महान् से अपने आयुध से,*
*नितरां घर में (उसके ही), काट डालता है, कठोर वाणी वाले को।। ८।।*

दुष्टों के लिये उग्र रूप को धारण करने वाला वह परमेश्वर दूसरों पर आक्रमण करने वाली, देवों से छीनकर सोम आदि का पान करने वाली, सुखसाधनों पर एकाधिकार करके लेट जाने वाली, प्रतिद्वन्द्वियों को परास्त कर डालने वाली, प्रकाश ज्ञान आदि को ढक लेने वाली महान् आसुरी शक्ति को अपने वश में कर लेता है। पाँव से रहित अर्थात् अस्थिर, दूसरों का भक्षण करने वाली, दुर्वचनों को बोलने वाली उस दुष्ट आसुरी शक्ति को वह जगदीश्वर अपनी महान् न्यायव्यवस्था के द्वारा उसके अपने ही स्थान में भली प्रकार छिन्न-भिन्न कर डालता है।

टि. *गतिशील को* – **अर्णम्।** उदकं प्रति - वे.। गन्तारम् - सा.। जलम् - दया.। moving - W. restless - G.

*मधु का पान करने वाले को* – **मधुपम्।** उदकस्य पातारम् – वे.। मधुनो ऽंभसः पातारं पालयितारम् – सा.। यन् मधूनि पाति तम् – दया.। having drunk the Soma - W.

*शत्रुपरास्ता को* – **असिन्वम्।** अबन्धनम् – वे.। सपत्नानाम् अवक्षेप्तारम् – सा.। **अबद्धम्** – दया.। subduing his foes - W. insatiate - G.

*आच्छादक को* – **वव्रम्।** वारकम् – वे.। वृण्वन्तं सर्वम् अप्याच्छादयन्तम् – सा.। वरणीयम् – दया.। enveloping the world - W.

